श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.26- षष्ठः सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**

**devīṃ(m) sarasvatīṃ(ṽ) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**nāmasaṅkīrtanaṃ(ỹ) yasya, sarvapāpapraṇāśanam**

**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ षड्विंशोऽध्यायः ॥**

**Śrīmadbhāgawatamahāpurāṇam**

**Ekādaśḥ skandhaḥ**

**..atha ṣaḍviṃśo'dhyāyaḥ..**

**श्रीभगवानुवाच**

**मल्लक्षणमिमं(ङ्) कायं(लँ), लब्ध्वा मद्धर्म आस्थितः ।**
**आनन्दं(म्) परमात्मान- मात्मस्थं(म्) समुपैति माम् ॥ 1॥**

śrībhagavānuvāca

mallakṣaṇamimaṃ(ṅ) kāyaṃ(l̐), labdhvā maddharma āsthitaḥ .
ānandaṃ(m) paramātmāna- mātmasthaṃ(m) samupaiti mām .. 1..

गुणमय्या जीवयोन्या, विमुक्तो ज्ञाननिष्ठया ।
गुणेषु मायामात्रेषु, दृश्यमानेष्ववस्तुतः ।
वर्तमानोऽपि न पुमान्, युज्यतेऽवस्तुभिर्गुणैः ॥ 2॥

guṇamayyā jīvayonyā, vimukto jñānaniṣṭhayā .
guṇeṣu māyāmātreṣu, dṛśyamāneṣvavastutaḥ .
vartamāno'pi na pumān, yujyate'vastubhirguṇaiḥ .. 2..

सं(ङ्)गं(न्) न कुर्यादसतां(म्), शिश्नोदरतृपां(ङ्) क्वचित् ।
तस्यानुगस्तमस्यन्धे, पतत्यन्धानुगान्धवत् ॥ 3॥

saṃ(ṅ)gaṃ(n) na kuryādasatāṃ(m), śiśnodaratṛpāṃ(ṅ) kvacit .
tasyānugastamasyandhe, patatyandhānugāndhavat .. 3..

ऐलः(स्) सम्राडिमां(ङ्) गाथा- मगायत बृहच्छ्रवाः ।
उर्वशीविरहान् मुह्यन्, निर्विण्णः(श्) शोकसं(यँ)यमे ॥ 4॥

ailaḥ(s) samrāḍimāṃ(ṅ) gāthā- magāyata bṛhacchravāḥ .
urvaśīvirahān muhyan, nirviṇṇaḥ(ś) śokasaṃ(y̐)yame .. 4..

त्यक्त्वाऽऽत्मानं(वँ) व्रजन्तीं(न्) तां(न्), नग्न उन्मत्तवन्नृपः ।
विलपन्नन्वगाज्जाये, घोरे तिष्ठेति विक्लवः ॥ 5॥

tyaktvā''tmānaṃ(v̐) vrajantīṃ(n) tāṃ(n), nagna unmattavannṛpaḥ .
vilapannanvagājjāye, ghore tiṣṭheti viklavaḥ .. 5..

कामानतृ*प्तोऽनुजुषन् , क्षुल्लकान् वर्षयामिनीः ।
न वेद यान्तीर्नायान्ती- रुर्व*श्याकृ*ष्टचेतनः ॥ 6॥

kāmānatṛ*pto'nujuṣan, kṣullakān varṣayāminīḥ .
na veda yāntīrnāyāntī- rurva*śyākṛ*ṣṭacetanaḥ .. 6..

ऐल उवाच

अहो मे मोहवि*स्तारः(ख्), कामक*श्मलचेतसः ।
देव्या गृहीतक*ण्ठ*स्य, नायुः(ख्) ख*ण्डा इमे स्मृताः ॥ 7॥

aila uvāca

aho me mohavi*stāraḥ(kh), kāmaka*śmalacetasaḥ .
devyā gṛhītaka*ṇṭha*sya, nāyuḥ(kh) kha*ṇḍā ime smṛtāḥ .. 7..

नाहं(वँ) वेदाभिनिर्मु*क्तः(स्), सूर्यो वाभ्युदितोऽमुया ।
मुषितो वर्षपूगानां(म्), बताहानि गतान्युत ॥ 8॥

nāhaṃ(v̐) vedābhinirmu*ktaḥ(s), sūryo vābhyudito'muyā .
muṣito varṣapūgānāṃ(m), batāhāni gatānyuta .. 8..

अहो मे आत्मसम्मोहो, येनात्मा योषितां(ङ्) कृतः ।
क्रीडामृग*श्च*क्रवर्ती, नरदेवशिखामणिः ॥ 9॥

aho me ātmasammoho, yenātmā yoṣitāṃ(ṅ) kṛtaḥ .
krīḍāmṛga*śca*kravartī, naradevaśikhāmaṇiḥ .. 9..

सपरि*च्छदमात्मानं(म्), हि*त्वा तृणमिवेश्वरम् ।
यान्तीं(म्) स्त्रियं(ञ्) चान्वगमं(न्),न*ग्न उ*न्मत्तवद् रुदन् ॥ 10॥

sapari*cchadamātmānaṃ(m), hi*tvā tṛṇamiveśvaram .

yāntīṃ(m) striyaṃ(ñ) cānvagamaṃ(n), nagna unmattavad rudan .. 10..

कुतस्तस्यानुभावः(स्) स्यात्, तेज ईशत्वमेव वा ।
योऽन्वगच्छं(म्) स्त्रियं(यँ) यान्तीं(ङ्), खरवत् पादताडितः ॥ 11 ॥

kutastasyānubhāvaḥ(s) syāt, teja īśatvameva vā .
yo'nvagacchaṃ(m) striyaṃ(ỹ) yāntīṃ(ṅ), kharavat pādatāḍitaḥ .. 11..

किं(वँ) विद्यया किं(न्) तपसा, किं(न्) त्यागेन श्रुतेन वा ।
किं(वँ) विविक्तेन मौनेन, स्त्रीभिर्यस्य मनो हृतम् ॥ 12 ॥

kiṃ(ṽ) vidyayā kiṃ(n) tapasā, kiṃ(n) tyāgena śrutena vā .
kiṃ(ṽ) viviktena maunena, strībhiryasya mano hṛtam .. 12..

स्वार्थस्याकोविदं(न्) धिङ् मां(म्), मूर्खं(म्) पण्डितमानिनम् ।
योऽहमीश्वरतां(म्) प्राप्य, स्त्रीभिर्गोखरवज्जितः ॥ 13 ॥

svārthasyākovidaṃ(n) dhiṅ māṃ(m), mūrkhaṃ(m) paṇḍitamāninam .
yo'hamīśvaratāṃ(m) prāpya, strībhirgokharavajjitaḥ .. 13..

सेवतो वर्षपूगान् मे, उर्वश्या अधरासवम् ।
न तृप्यत्यात्मभूः(ख्) कामो, वह्निराहुतिभिर्यथा ॥ 14 ॥

sevato varṣapūgān me, urvaśyā adharāsavam .
na tṛpyatyātmabhūḥ(kh) kāmo, vahnirāhutibhiryathā .. 14..

पुं(म्)श्चल्यापहृतं(ञ्) चित्तं(ङ्), को न्वन्यो मोचितुं(म्) प्रभुः ।
आत्मारामेश्वरमृते, भगवन्तमधोक्षजम् ॥ 15 ॥

puṃ(m)ścalyāpahṛtaṃ(ñ) cittaṃ(ṅ), ko nvanyo mocituṃ(m) prabhuḥ .
ātmārāmeśvaramṛte, bhagavantamadhokṣajam .. 15..

बोधित*स्यापि देव्या मे, सूक्तवाक्येन दुर्मतेः ।
मनोगतो महामोहो, नापयात्यजितात्मनः ॥ 16॥

bodhita*syāpi devyā me, sūktavākyena durmateḥ .
manogato mahāmoho, nāpayātyajitātmanaḥ .. 16..

किमेतया नोऽपकृतं(म्), रज्ज्वा वा सर्पचेतसः ।
रज्जु*स्वरूपाविदुषो, योऽहं(यँ) यदजितेन्द्रियः ॥ 17॥

kimetayā nopakṛtaṃ(m), rajjvā vā sarpacetasaḥ .
rajju*svarūpāviduṣo, yo'haṃ(ỹ) yadajitendriyaḥ .. 17..

क्वायं(म्) मलीमसः(ख्) कायो, दौर्गन्ध्याद्यात्मकोऽशुचिः ।
क्व गुणाः(स्) सौमन*स्याद्या, ह्य*ध्यासोऽवि*द्यया कृतः ॥ 18॥

kvāyaṃ(m) malīmasaḥ(kh) kayo, daurgandhyādyātmako'śuciḥ .
kva guṇāḥ(s) saumana*syādyā, hya*dhyāso'vi*dyayā kṛtaḥ .. 18..

पि*त्रोः(ख्) किं(म्) स्वं(न्) नु भार्यायाः(स्), स्वामिनोऽग्नेः(श्) श्वगृ*ध्रयोः ।
किमात्मनः(ख्) किं(म्) सुहृदा- मिति यो नावसीयते ॥ 19॥

pi*troḥ(kh) kiṃ svaṃ(n) nu bhāryāyāḥ(s), svāmino'gneḥ(ś) śvagṛ*dhrayoḥ .
kimātmanaḥ(kh) kiṃ(m) suhṛdā- miti yo nāvasīyate .. 19..

त*स्मिन् कलेवरेऽमेध्ये, तु*च्छनि*ष्ठे विषज्जते ।
अहो सुभ*द्रं(म्) सुनसं(म्), सु*स्मितं(ञ्) च मुखं(म्) स्त्रियः ॥ 20॥

ta*smin kalevare'medhye, tu*cchani*ṣṭhe viṣajjate .
aho subha*draṃ(m) sunasaṃ(m), su*smitaṃ(ñ) ca mukhaṃ(m) striyāḥ .. 20..

त्वङ्मांस(म्)सरुधिरस्नायु- मेदोमज्जास्थिसं(म्)हतौ।

विण्मूत्रपूये रमतां(ङ्), कृमीणां(ङ्) कियदन्तरम् ॥ 21॥

tvaṅmāṃ(m)sarudhirasnāyu- medomajjāsthisaṃ(m)hatau .

viṇmūtrapūye ramatāṃ(ṅ), kṛmīṇāṃ(ṅ) kiyadantaram .. 21..

अथापि नोपसज्जेत, स्त्रीषु स्त्रैणेषु चार्थवित् ।

विषयेन्द्रियसं(यँ)योगान्- मनः क्षुभ्यति नान्यथा ॥ 22॥

athāpi nopasajjeta, strīṣu straiṇeṣu cārthavit .

viṣayendriyasaṃ(ỹ)yogān- manaḥ kṣubhyati nānyathā .. 22..

अदृष्टादश्रुताद् भावान्- न भाव उपजायते ।

असम्प्रयुं(ञ्)जतः(फ्) प्राणान्, शाम्यति स्तिमितं(म्) मनः ॥ 23॥

adṛṣṭādaśrutād bhāvān- na bhāva upajāyate .

asamprayuṃ(ñ)jataḥ(ph) prāṇān, śāmyati stimitaṃ(m) manaḥ .. 23..

तस्मात् सं(ङ्)गो न कर्तव्यः(स्), स्त्रीषु स्त्रैणेषु चेन्द्रियैः ।

विदुषां(ञ्) चाप्यविश्रब्धः(ष्), षड्वर्गः(ख्) किमु मादृशाम् ॥ 24॥

tasmāt saṃ(ṅ)go na kartavyaḥ(s), strīṣu straiṇeṣu cendriyaiḥ .

viduṣāṃ(ñ) cāpyaviśrabdhaḥ(ṣ), ṣaḍvargaḥ(kh) kimu mādṛśām .. 24..

श्रीभगवानुवाच

एवं(म्) प्रगायन् नृपदेवदेवः(स्),

स उर्वशीलोकमथो विहाय ।

आत्मानमात्मन्यवगम्य मां(वँ) वै,

उपारमज्ज्ञानविधूतमोहः ॥ 25॥

śrībhagavānuvāca

evaṃ(m) pragāyan nṛpadevadevaḥ(s)

sa urvaśīlokamatho vihāya .

ātmānamātmanyavagamya māṃ(v̐) vai

upāramajjñānavidhūtamohaḥ .. 25..

ततो दुः(स्)सं(ङ्)गमुत्सृज्य, सत्सु सज्जेत बुद्धिमान् ।

सन्त एतस्य छिन्दन्ति, मनोव्यासं(ङ्)गमुक्तिभिः ॥ 26॥

tato duḥ(s)saṃ(ṅ)gamutsṛjya, satsu sajjeta buddhimān .

santa etasya chindanti, manovyāsaṃ(ṅ)gamuktibhiḥ .. 26..

सन्तोऽनपेक्षा मच्चित्ताः(फ्), प्रशान्ताः(स्) समदर्शिनः ।

निर्ममा निरहं(ङ्)कारा, निर्द्वन्द्वा निष्परिग्रहाः ॥ 27॥

santo'napekṣā maccittāḥ(ph), praśāntāḥ(s) samadarśinaḥ .

nirmamā nirahaṃ(ṅ)kārā, nirdvandvā niṣparigrahāḥ .. 27..

तेषु नित्यं(म्) महाभाग, महाभागेषु मत्कथाः ।

सम्भवन्ति हिता नृणां(ञ्), जुषतां(म्) प्रपुनन्त्यघम् ॥ 28॥

teṣu nityaṃ(m) mahābhāga, mahābhāgeṣu matkathāḥ .

sambhavanti hitā nṝṇāṃ(ñ), juṣatāṃ(m) prapunantyagham .. 28..

ता ये शृण्वन्ति गायन्ति, ह्यनुमोदन्ति चादृताः ।

मत्पराः(श्) श्रद्दधानाश्च, भक्तिं(वँ) विन्दन्ति ते मयि ॥ 29॥

tā ye śṛṇvanti gāyanti, hyanumodanti cādṛtāḥ .

matparāḥ(ś) śraddadhānāśca, bhaktiṃ(v̐) vindanti te mayi .. 29..

भक्तिं(लँ) लब्धवतः(स्) साधोः(ख्), किमन्यदवशिष्यते ।
मय्यनन्तगुणे ब्रह्मण्- यानन्दानुभवात्मनि ॥ 30॥

bhaktiṃ(l̐) labdhavataḥ(s) sādhoḥ(kh), kimanyadavaśiṣyate .
mayyanantaguṇe brahmaṇ- yānandānubhavātmani .. 30..

यथोपश्रयमाणस्य, भगवन्तं(वँ) विभावसुम् ।
शीतं(म्) भयं(न्) तमोऽप्येति, साधून् सं(म्)सेवतस्तथा॥ 31॥

yathopaśrayamāṇasya, bhagavantaṃ(v̐) vibhāvasum .
śītaṃ(m) bhayaṃ(n) tamo'pyeti, sādhūn saṃ(m)sevatastathā .. 31..

निमज्ज्योन्मज्जतां(ङ्) घोरे, भवाब्धौ परमायनम् ।
सन्तो ब्रह्मविदः(श्) शान्ता, नौर्दृढेवाप्सु मज्जताम् ॥ 32॥

nimajjyonmajjatāṃ(ṅ) ghore, bhavābdhau paramāyaṇam .
santo brahmavidaḥ(ś) śāntā, naurdṛḍhevāpsu majjatām .. 32..

अन्नं(म्) हि प्राणिनां(म्) प्राण, आर्तानां(म्) शरणं(न्) त्वहम् ।
धर्मो वित्तं(न्) नृणां(म्) प्रेत्य, सन्तोऽर्वाग् बिभ्यतोऽरणम्॥ 33॥

annaṃ(m) hi prāṇināṃ(m) prāṇa, ārtānāṃ(m) śaraṇaṃ(n) tvaham .
dharmo vittaṃ(n) nṛṇāṃ(m) pretya, santo'rvāg bibhyato'raṇam .. 33..

सन्तो दिशन्ति चक्षूं(म्)षि, बहिरर्कः(स्) समुत्थितः ।
देवता बान्धवाः(स्) सन्तः(स्), सन्त आत्माहमेव च ॥ 34॥

santo diśanti cakṣūṃ(m)ṣi, bahirarkaḥ(s) samutthitaḥ .
devatā bāndhavāḥ(s) santaḥ(s), santa ātmāhameva ca .. 34..

वैतसेनस्ततोऽप्येव- मुर्वश्या लोकनिः(स्) स्पृहः ।
मुक्तसं(ङ्)गो महीमेता- मात्मारामश्चचार ह ॥ 35॥

vaitasenastato'pyeva- murvaśyā lokaniḥ(s) spṛhaḥ .
muktasaṃ(ṅ)go mahīmetā- mātmārāmaścacāra ha .. 35..

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धे षड्विं(म्)शोऽध्यायः ॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(m)syāṃ(m)
saṃ(m)hitāyāmekādaśaskandhe ṣaḍviṃ(m)śo'dhyāyaḥ .. 26..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|
Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||
Om Shāntih(ś) Shāntih(ś) Shāntih ||

